# Rasakrida

# રાસક્રીડા

## Document Information

Text title : rAsakrIDA

File name : rAsakrIDA.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રાસક્રીડા

નમઃ શ્રીરાસરસિકાય ।

શારદશશધરવીક્ષણહૃષ્ટઃ
　　પરમવિલાસાલિભિરભિમૃષ્ટઃ ।
વલ્લવરમણીમણ્ડલભાવઃ
　　પ્રોલ્લાસકકલમુરલીરાવઃ ॥ ૧॥

અથ સકલાભિર્મદવિકલાભિ-
　　ર્નિશિ પરિભૂય સ્વજનાન્ ભૂયઃ ।
અવિરુવતીભિર્નવયુવતીભિ-
　　ર્વિહિતોદ્દેશઃ સુન્દરવેશઃ ॥ ૨॥

મિલિતમૃગાક્ષીવાઞ્છિતસાક્ષી
　　કૃતપરિહાસઃ સ્ફીતવિલાસઃ ।
તદમલવાણીનિશિતકૃપાણી
　　દલિતનિકારઃ કલિતવિકારઃ ॥ ૩॥

પ્રમદોત્તરલિતવલ્લવનારી
　　મુખચુમ્બનપરિરમ્ભણકારી ।
ઉન્નતમનસાં સુદૃશાં માન
　　પ્રેક્ષણતઃ કલિતાન્તર્ધાનઃ ॥ ૪॥

અનુકૃતચરિતઃ પુલિને પરિત-
　　સ્તરુષુ ચ પૃષ્ટઃ ક્વાપિ ન દૃષ્ટઃ ।
યવતિચમૂભિસ્ત્વરિતમમૂભિ-
　　ર્મુહુરનુગીતઃ કુતુકપરીતઃ ॥ ૫॥

કાકિભિરાભિઃ પ્રાર્થિતસઙ્ગઃ
　　પ્રકટિતમૂર્તિર્ધૃતરતિરઙ્ગઃ ।
કિમપિ નિગૂઢરુષા પરિપૃષ્ટઃ

કલિતોત્તરવિધિરલમુપવિષ્ટઃ ॥ ૬॥

કરુણાશીલઃ ખણ્ડિતપીલઃ
સ્તવકિતલીલઃ કુવલયનીલઃ ।
ધૃતમૃદુહાસઃ પ્રેમવિલાસ-
સ્તતતનુવાસઃ કલ્પિતરાસઃ ॥ ૭॥

અથ પરિકલ્પિતમણ્ડલબન્ધઃ
કુસુમશરાસનવિભ્રમકન્દઃ ।
યુવતીયુગયુગસુભગસ્કન્ધ
ન્યસ્તલસદ્ભુજદણ્ડદ્વન્દ્વઃ ॥ ૮॥

અલિપરિવીતે મારુતશીતે
વરસઙ્ગીતે ભુવનાતીતે ।
ભૂષણતારધ્વનિપરિસાર
ક્રાન્તવનાન્તે શશિરુચિકાન્તે ॥ ૯॥

મધ્યગમધ્યગમધુપવિરાજિ
સ્ફુટચમ્પકતતિવિભ્રમભાજિ ।
રાસે કૃતરુચિરન્તસ્થાયી
વેણુમુખાધરપલ્લવદાયી ॥ ૧૦॥

સ્તમ્ભિતરાકાપતિરવિકારાન્
અપિ સુરદારાન્ મદયન્ન્ આરાત્ ।
કુતુકાકૃષ્ટશ્ચિરમભિવૃષ્ટઃ
સપદિ વિલૂનૈઃ સુરતરુસૂનૈઃ ॥ ૧૧॥

અથ કલ્પીકૃતરજનિવિહારી
ખસ્થસુરાસુરવિસ્મયકારી ।
નિજનિજનિકટસ્થિતિવિજ્ઞાન
પ્રમુદિતરમણીકૃતસમ્માનઃ ॥ ૧૨॥

નિજદૃગ્ભઙ્ગીક્ષુભિતકુરઙ્ગી
નયનામણ્ડલગુરુકુચસઙ્ગી ।
કેલિવિલોલઃ પ્રચલનિચોલઃ
સ્વેદજલાઙ્કુરચારુકપોલઃ ॥ ૧૩॥

કુમુદયુતાયાં તરણિસુતાયાં
    સલિલવિનોદપ્રવલિતમોદઃ ।
યુવતિનિકાયપ્રોક્ષિતકાયઃ
    શિથિલિતમાલઃ પુલકકરાલઃ ॥ ૧૪॥

અથ વનમાલી વરવિપિનાલી
    કુઞ્જનિકેતનવીક્ષણશાલી ।
જયતિ વિહારિ નિશિ મણિહારી
    વ્રજતરુણીગણમાનસહારી ॥ ૧૫॥

નતજનબન્ધો જય રસસિન્ધો
    વદનોલ્લસિતશ્રમજલબિન્દો ।
ત્વમખિલદેવાવલિકૃતસેવા
    સન્તતિરધમા વયમિહ કે વા ॥ ૧૬॥

જય જય કુણ્ડલયુગરુચિમણ્ડલ
    વૃતગણ્ડસ્થલ દમિતાખણ્ડલ ।
ધૃતગોવર્ધન ગોકુલવર્ધન
    દેહિ રતિં મે ત્વયિ મુરમર્દન ॥ ૧૭॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં રાસક્રીડા સમાપ્તા ।

*Rasakrida*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*